
द्वितीयः पाठः

# पाथेयम्



**सोत्साहानां नास्त्यसाध्यं नराणाम्। मार्गारब्धाः सर्वयत्नाः फलन्ति।**

**विवेकः** अये विशाल! नमस्ते! आगच्छ, उपविश।

**विशालः** नमस्ते! विवेक! उपविशामि परन्तु त्वं तु कुत्रापि गन्तुम् उद्यतः इव प्रतीयसे।

**विवेकः** आम्! मम मातुलः युद्धक्षेत्रात् प्रतिनिवृत्तः। अहं तं द्रष्टुं गच्छामि।

**विशालः** अहो! धन्यः तव मातुलः यः एवं देशसेवायां संलग्नः। अत्र स्यूते किमेतत् नयसि?

**विवेकः** स्यूते पाथेयम् अस्ति।

**विशालः** पाथेयं किं भवति?

**विवेकः** (विहस्य) शृणु, पथि हितकरं पाथेयं भवति। अतः स्यूते कानिचित् फलानि अथ च, ज्ञानवर्धनाय द्वित्राणि पुस्तकानि अपि सन्ति।

**विशालः** इदानीं ज्ञातम्। अतएव अस्माकं 'मणिका' पाठ्यपुस्तके 'पाथेयम्' इति पाठे सुभाषितानि सन्ति।

**विवेकः** ननु सुभाषितानि एव अस्माकं जीवने मार्गदर्शनं कुर्वन्ति।

**विशालः** शुभाय भवतु ते पाथेयम्।

द्वितीयः पाठः

# पाथेयम्

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते॥ 1॥

कल्पद्रुमः कल्पितमेव सूते,
सा कामधुक् कामितमेव दोग्धि।
चिन्तामणिश्चिन्तितमेव दत्ते,
सतां हि सङ्गः सकलं प्रसूते॥ 2॥

गच्छन् पिपीलको याति योजनानां शतान्यपि।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति॥ 3॥

शोको नाशयते धैर्यं, शोको नाशयते श्रुतम्।
शोको नाशयते सर्वं, नास्ति शोकसमो रिपुः॥ 4॥

गौरवं प्राप्यते दानात् न तु वित्तस्य सञ्चयात्।
स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः॥ 5॥

सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम्।
असद्भिः शपथेनापि जले लिखितमक्षरम्॥ 6॥

भवन्ति नम्रास्तरवः फलोद्गमैः
नवाम्बुभिर्भूरिविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्॥ 7॥

काष्ठादग्निर्जायते मथ्यमानाद्
भूमिस्तोयं खन्यमाना ददाति।
सोत्साहानां नास्त्यसाध्यं नराणां
मार्गारब्धाः सर्वयत्नाः फलन्ति॥ 8॥

वयमिह परितुष्टाः वल्कलैस्त्वं दुकूलैः
सम इह परितोषो निर्विशेषो विशेषः।
स तु भवति दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः॥ 9॥

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः कुलस्य विनयो वित्तस्य पात्रे व्ययः।
अक्रोधस्तपसः क्षमा बलवतां धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम्॥ 10॥

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अनुद्धताः** (वि०) [न उद्धताः (नञ् त० पु०)] | निरभिमानिनः, अभिमानरहिताः | अभिमान रहित | modest. |
| **उपशमः** (सं०) | मनः शान्तिः | मन को शान्त रखना, अंहकार से दूर रहना | tranquillity of mind. |
| **खन्यमाना**(वि०) [खन्+कर्म०वा०+शानच् (स्त्री०) प्र०ए०व०] | खननं क्रियामाणा | खोदी जाती हुई | being dug. |
| **गच्छन्** (वि०)(गम्+शतृ प्र०ए०व०) | व्रजन् | जाता हुआ | while going. |
| **तृष्णा** (सं०)(स्त्री०, प्र०ए०व०) | कामना, लालसा | इच्छा, लालसा | desire, hankering. |
| **तोयम्** (सं०)(नपुं० प्र०ए०व०) | जलम् | पानी | water. |
| **दुकूलैः** (सं०)(नपुं० तृ०ब०व०) | चीनांशुकैः | रेशमी वस्त्रों से | with silken garments. |
| **नवाम्बुभिः** (सं०)(पुं० तृ०ब०व०) | नवीनजलैः (युक्ताः) | नवीनजल से (परिपूर्ण) | (filled) with fresh waters. |
| **निर्विशेषः** निर्गतः विशेषः यस्मात् स निर्विशेषः [ब०व्री०] | यत्र भेदो नास्ति | जहाँ भेदभाव नहीं है | where there is no difference. |

| | | | |
|---|---|---|---|
| **निर्व्याजता** (सं०) [व्याजस्य अभाव: निर्व्याज:; तस्य भाव: निर्व्याजता] | कपटशून्यता | छल से दूर रहना | without sense of deceit and wickedness. |
| **निवेदितवान्** (क्रि०) [नि+विद्+णिच्, क्तवतु, प्र०ए०व०] | निवेदनम् अकरोत् | निवेदन किया | represented, stated. |
| **पयोदानाम्** (सं०) (पु०ष०ब०व०)[पय: ददाति इति पयोद:, तेषाम्](उप०त०पु०) | मेघानाम् | बादलों के | of the clouds. |
| **पयोधीनाम्** [पयांसि धीयन्ते अस्मिन् पयोधि:, तेषाम्] | सागराणाम् | समुद्रों के | of the oceans. |
| **पाथेयम्** (सं०)(नपुं० प्र०ए०व०)[पथि हितम्] | जीवनयात्रायै सुभाषितरूपा भोज्यसामग्री | जीवनयात्रा के लिए सुभाषित रूपी भोज्यसामग्री | good saying as provisions for the journey of life. |
| **पिपीलक:** (सं०) (पुं०प्र०ए०व०) | पिपीलक: | चींटा | an ant. |
| **फलोद्गमै:** (सं०) (पुं०तृ०ब०व०) | फलानाम् उद्गमै: (ष०त०पु०) | फलों के आने से | with the coming of fruits. |
| **भूरिविलम्बिन:** (वि०)(पु०प्र०ब०व०) | (भूमिं प्रति) अति लम्बमाना: | (भूमि की ओर) अत्यधिक लटके हुए | hanging much below (towards the earth). |
| **मथ्यमानात्** (वि०)[मथ्+कर्मवा.+शानच्, पं०ए०व०] | मन्थनं क्रियमाणात् | जिसका मन्थन किया जा रहा है, उससे (रगड़ने से) | being churned (being stirred) |
| **मार्गारब्धा:** (वि०)[मार्गे आरब्धा: (स०त०पु०), आ+रभ्+क्त,] (पु०प्र०ब०व०] | समुचितदिशि प्रवर्तिता: | सही दिशा में किये गये (प्रयत्न) | efforts made in right direction. |
| **मूढै:** (वि०)(पुं०तृ०ब०व०) | मन्दबुद्धिभि:, मूर्खै: | नासमझ मूर्खों द्वारा | by unintelligent, by fools. |
| **रत:** (वि०) [रम्+क्त](पुं० प्र०ए०व०) | लीन:, तल्लीन: | लगा हुआ, संलग्न | engrossed. |
| **वल्कलै:** (सं०) (पुं०तृ०ब०व०) | वृक्षाणां त्वग्भि: निर्मितै: वस्त्रै: | वृक्ष की छाल से बने वस्त्रों से | by the garments made of the beark of trees. |

| | | | |
|---|---|---|---|
| **वाक्संयमः** (सं०) (पुं०प्र०ए०व०)[वाचि संयमः (स०त०पु०)] | वाचः नियमनम्, अपभाषणाद् वा निवृत्तिः | वाणी का संयम | control over language. |
| **विधीयते** (क्रि०) [वि+धा, कर्मवा०, लट् प्र० पु०ए०व०] | क्रियते | किया जाता है | is done. |
| **सद्भिः** (वि०) (पुं० सत् तृ०ब०व०] | सज्जनैः | सज्जनों द्वारा | by gentlemen. |

## इदमपि जानन्तु

### सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| नम्रास्तरवः | = | नम्राः+तरवः | सद्भिस्तु | = | सद्भिः+तु |
| काष्ठादग्निः | = | काष्ठात्+अग्निः | अग्निर्जायते | = | अग्निः+जायते |
| भूमिस्तोयम् | = | भूमिः+तोयम् | नास्त्यसाध्यम् | = | न+अस्ति+असाध्यम् |
| शतान्यपि | = | शतानि+अपि | स्थितिरुच्चैः | = | स्थितिः+उच्चैः |
| वल्कलैस्त्वम् | = | वल्कलैः+त्वम् | कोऽर्थवान् | = | कः+अर्थवान् |
| अक्रोधस्तपसः | = | अक्रोधः+तपसः | नवाम्बुभिर्भूरिविलम्बिनः | = | नवाम्बुभिः+भूरिविलम्बिनः |
| चिन्तामणिश्चिन्तितम् | = | चिन्तामणिः+चिन्तितम् | | | |

### सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| सङ्गः+सकलम् | = | सङ्गस्सकलम् | असद्भिः+शपथेन | = | असद्भिश्शपथेन |
| सत्पुरुषाः+समृद्धिभिः | = | सत्पुरुषास्समृद्धिभिः | मार्गारब्धाः+सर्वयत्नाः | = | मार्गारब्धास्सर्वयत्नाः |

### संयोगः

| | | | | | |
|---|---|---|---|---|---|
| पयोधीनामधः | = | पयोधीनाम्+अधः | शिलालिखितमक्षरम् | = | शिलालिखितम्+अक्षरम् |
| सर्वेषामपि | = | सर्वेषाम्+अपि | सर्वकारणमिदम् | = | सर्वकारणम्+इदम् |
| वयमिह | = | वयम्+इह | कामितमेव | = | कामितम्+एव |

# अभ्यासः

**1. संस्कृतभाषया एकपदेन उत्तराणि लिखत –**

(क) पृथिव्यां कति रत्नानि? ....................................

(ख) केषाम् उद्गमैः तरवः नम्राः भवन्ति? ....................................

(ग) के समृद्धिभिः अपि अनुद्धताः भवन्ति? ....................................

(घ) परं भूषणं किम्? ....................................

(ङ) पयोदाः कैः भूरिविलम्बिनः जायन्ते? ....................................

(च) कः कल्पितमेव जनयति? ....................................

(छ) कस्मिन् परितुष्टे दरिद्र-धनिकयोः भेदः नश्यति? ....................................

**2. पूर्णवाक्येन संस्कृतभाषया उत्तराणि लिखत –**

(क) गौरवं कथं प्राप्यते?

........................................................................................................................

(ख) परोपकारिणां स्वभावः कीदृशः वर्तते?

........................................................................................................................

(ग) शोकः किं किं नाशयति?

........................................................................................................................

(घ) दरिद्रः कः भवति?

........................................................................................................................

(ङ) कस्य किं विभूषणम्? त्रीणि उदाहरणानि लिखत।

........................................................................................................................

(च) कः सर्वं प्रसूते?

........................................................................................................................

(छ) कीदृशी भूमिः तोयं ददाति?

........................................................................................................................

**3. अधोलिखितवाक्येषु स्थूलाक्षरपदानि आधृत्य प्रश्नान् रचयत –**

(क) मूढैः **पाषाणखण्डेषु** रत्नसंज्ञा विधीयते। ..................................................

(ख) **सद्भिः** लीलया प्रोक्तं शिलालिखितमक्षरम्। ..................................................

(ग) **मथ्यमानात्** काष्ठात् अग्निर्जायते। ..................................................

(घ) **वैनतेयः** अगच्छन् एकं पदं न गच्छति। ..................................................

(ङ) **ऐश्वर्यस्य** विभूषणं सुजनता। ..................................................

(च) **उत्साहवतां** किञ्चिद् असाध्यं नास्ति। ..................................................

(छ) शोकः **धैर्यं** नाशयति। ..................................................

(ज) महान् भवितुं **सत्सङ्गतिः** अपेक्षिता। ..................................................

**4. अधोलिखितप्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'गच्छन् पिपीलको याति योजनानां शतान्यपि' अस्मिन् 'पिपीलकः' इति कर्तृपदस्य किं क्रियापदं प्रयुक्तम्? ..............................

(ख) 'नास्ति शोकसमो रिपुः' अस्मिन् वाक्ये 'मित्रम्' इति पदस्य किं विलोमपदं प्रयुक्तम्? ..............................

(ग) 'मार्गारब्धाः सर्वयत्नाः फलन्ति' अस्मिन् वाक्ये किं कर्तृपदं प्रयुक्तम्? ..............................

(घ) 'स तु भवति दरिद्रो यस्य तृष्णा विशाला' अस्मिन् वाक्ये 'विशाला' इति पदस्य किं विशेष्यपदं प्रयुक्तम्? ..............................

(ङ) 'भूमिस्तोयं खन्यमाना ददाति' अत्र किं विशेषणपदं वर्तते? ..............................

(च) 'स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः' अस्मिन् वाक्ये 'मेघानाम्' इति पदस्य किं पर्यायपदं प्रयुक्तम्? ..............................

**5. स्तम्भद्वये लिखितानां विपरीतार्थकशब्दानां समुचितमेलनं कृत्वा लिखत–**

| | | | |
|---|---|---|---|
| (क) अर्थवान् | (i) अधः | यथा (क) अर्थवान् | (iii) दरिद्रः |
| (ख) उच्चैः | (ii) परितोषः | .............................. | .............................. |
| (ग) तृष्णा | (iii) दरिद्रः | .............................. | .............................. |
| (घ) सज्जनः | (iv) मित्रम् | .............................. | .............................. |
| (ङ) वल्कलैः | (v) दुर्जनः | .............................. | .............................. |
| (च) शोकः | (vi) हर्षः | .............................. | .............................. |
| (छ) रिपुः | (vii) दुकूलैः | .............................. | .............................. |

6. **अधोलिखितेषु द्वे शुद्धे पर्यायपदे चित्वा लिखत -**

(क) तरुः - वृक्षः, महीरुहः, महीभृत्। .............................. ..............................

(ख) पयोदः - सागरः, मेघः, वारिदः। .............................. ..............................

(ग) पयोधिः - उदधिः, अम्बुवाहः, जलधिः। .............................. ..............................

(घ) आपः - जलम्, वर्षा, वारि। .............................. ..............................

(ङ) भूमिः - पृथ्वी, वसुन्धरा, महीपतिः। .............................. ..............................

7. **अधोलिखितेषु सूक्तेः शुद्धम् अर्थं चिनुत -**

(क) **सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम्।**

(i) सज्जनैः क्रीडया एव शिलाखण्डेषु अक्षराणि लिख्यन्ते।

(ii) सज्जनाः प्रभुलीलया एव अक्षराणि पाषाणखण्डेषु लिखन्ति।

(iii) सज्जनाः यत् किञ्चित् सामान्येन अपि कथयन्ति तत् पाषाणे लिखितम् इव भवति।

(ख) **मार्गारब्धाः सर्वयत्नाः फलन्ति।**

(i) मार्गे दैवयोगेन सर्वे यत्नाः फलन्ति।

(ii) ताः एव चेष्टाः फलदायिकाः भवन्ति याः उचितमार्गे सोद्देश्यं प्रारभ्यन्ते।

(iii) आरम्भे सर्वे यत्नाः मार्गे फलदायकाः भवन्ति।

(ग) **अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति।**

(i) सततम् अगच्छन् अपि गरुडः शतं क्रोशान् गच्छति।

(ii) विनतायाः पुत्रः गरुडः शनैः गच्छन् अपि स्वगन्तव्यं न प्राप्नोति।

(iii) तीव्रगामी अपि गरुडः यदि न चलति तर्हि एकं पदमपि न सरति।

8. **अस्मिन् पाठे विविधभावयुक्ताः श्लोकाः सन्ति। अधोलिखितानां भावानां समक्षं तेन भावेन सम्बद्धां पङ्क्तिं लिखत -**

**भावः** **श्लोकपङ्क्तिः**

**यथाहि - दानम्**- गौरवं प्राप्यते दानात् न तु वित्तस्य सञ्चयात्।

(क) उत्साहः .................................. (घ) सत्सङ्गतिः ..................................

(ख) सन्तोषः .................................. (ङ) परोपकारः ..................................

(ग) क्षमा .................................. (च) शीलम् ..................................

**9. समुचितपदैः रिक्तस्थानानि पूरयत –**

(क) अनुद्धताः .................................. समृद्धिभिः।

(ख) पृथिव्यां त्रीणि रत्नानि .................................. सुभाषितम्।

(ग) सोत्साहानां नराणां नास्ति ..................................।

(घ) नास्ति .................................. रिपुः।

(ङ) स्थितिरुच्चैः .................................. अधः स्थितिः ..................................।

(च) वयमिह परितुष्टाः .................................. त्वं ..................................।

(छ) सद्भिः लीलया प्रोक्तं ..................................।

**10. अधोलिखितम् अन्वयं पूरयत –**

तरवः .................................. नम्राः भवन्ति, .................................. घनाः भूरिविलम्बिनः (भवन्ति), सत्पुरुषाः .................................. अनुद्धताः (भवन्ति), परोपकारिणाम् एष एव स्वभावः (भवति)।



## अन्वयः

1. **अन्वयः** – पृथिव्याम् जलम् अन्नम् सुभाषितम् (च) त्रीणि (एव) रत्नानि (भवन्ति)। मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।

2. **अन्वयः** – कल्पद्रुमः कल्पितम् एव सूते, सा कामधुक् कामितम् एव दोग्धि, चिन्तामणिः चिन्तितम् एव दत्ते। सतां सङ्गः हि सकलं प्रसूते।

3. **अन्वयः** – गच्छन् पिपीलकः योजनानाम् शतानि अपि याति। अगच्छन् वैनतेयः एकम् पदम् अपि न गच्छति।

4. **अन्वयः** – शोकः धैर्यम् नाशयते, शोकः श्रुतम् (अपि) नाशयते। शोकः सर्वम् नाशयते। शोकसमः रिपुः न अस्ति।

5. **अन्वयः** – दानात् गौरवम् प्राप्यते वित्तस्य सञ्चयात् तु न (एव प्राप्यते)। पयोदानाम् स्थितिः उच्चैः (भवति), पयोधीनां स्थितिः अधः (एव भवति)।

6. **अन्वयः** – सद्भिः तु लीलया प्रोक्तम् शिलालिखितम् अक्षरम् (इव भवति)। असद्भिः शपथेन अपि (प्रोक्तम्) जले लिखितम् अक्षरम् (इव भवति)।

7. **अन्वयः** – तरवः फल–उद्गमैः नम्राः भवन्ति, घनाः नवाम्बुभिः भूरिविलम्बिनः (भवन्ति)। सत्पुरुषाः समृद्धिभिः अनुद्धताः (भवन्ति), एष एव परोपकारिणाम् स्वभावः (भवति)।

8. **अन्वयः** – मथ्यमानात् काष्ठात् अग्निः जायते, खन्यमाना भूमिः तोयम् ददाति। सोत्साहानाम् नराणाम् (कृते किमपि) असाध्यम् न अस्ति। मार्गे–आरब्धाः सर्वयत्नाः फलन्ति।

9. **अन्वयः** – इह वयम् वल्कलैः परितुष्टाः (स्मः परम्) त्वम् दुकूलैः (परितुष्टः असि)। इह परितोषः समः (अस्ति)। विशेषः निर्विशेषः (अस्ति), सः तु दरिद्रः (भवति) यस्य तृष्णा विशाला (अस्ति), परितुष्टे मनसि दरिद्रः कः (अस्ति?), अर्थवान् कः (अस्ति?) च।

10. **अन्वयः** – ऐश्वर्यस्य विभूषणम् सुजनता (भवति), शौर्यस्य (विभूषणम्) वाक्यसंयमः (भवति), ज्ञानस्य (विभूषणम्) उपशमः (भवति), कुलस्य (विभूषणम्) विनयः (भवति), वित्तस्य (विभूषणम्) पात्रे व्ययः (भवति), तपसः (विभूषणम्) अक्रोधः (भवति), बलवताम् (विभूषणम्) क्षमा (भवति), धर्मस्य (विभूषणम्) निर्व्याजता (भवति), सर्वेषाम् अपि सर्वकारणम् इदम् शीलम् परम् भूषणम् (अस्ति)।

## योग्यताविस्तारः

### (क) भावविस्तारः

**विविधभावैः युक्ताः सूक्तीः पठत –**

(i) परोपकाराय हि सतां विभूतयः।

(ii) सत्सङ्गतिः कथय किं न करोति पुंसाम्?

(iii) हीयते हि मतिस्तात हीनैः सह समागमात्।

(iv) विद्या विनयोपेता हरति न चेतांसि कस्य मनुजस्य?

(v) आचारः परमो धर्मः।

(vi) काले खलु समारब्धाः फलं बध्नन्ति नीतयः।

(vii) सन्तोष एव पुरुषस्य परं निधानम्।

(viii) क्षमा शस्त्रं करे यस्य दुर्जनः किं करिष्यति?

(ix) चित्ते वाचि क्रियायां च साधूनामेकरूपता।

### (ख) अधोलिखितासु सूक्तिषु प्रश्नोत्तरमाध्यमेन कार्यकारणभावं पठत –

| | |
|---|---|
| (i) इन्धनं केन चन्दनायते? | मलयाचलगन्धेन। |
| (ii) दुर्जनः केन सज्जनायते? | सज्जनसङ्गेन। |
| (iii) दानेन कानि नाशं यान्ति? | वैराणि अपि। |
| (iv) लक्ष्मीः कम् उपैति? | उद्योगिनं पुरुषसिंहम्। |
| (v) खिन्नं चापि मनः केन रमते? | सुभाषितेन। |
| (vi) वसुधैव कुटुम्बकं केषाम्? | उदारचरितानाम्। |
| (vii) सर्वत्र सम्पदः कस्य? | यस्य सन्तुष्टं मानसम्। |
| (viii) विनयात् कां याति? | पात्रताम्। |

## ( ग ) भावविस्तारः

### रूपभेदः

अधोलिखितपदानां षष्ठी बहुवचने भेदं विलोक्य अवगच्छत –

| | | | ( सर्वनाम ) | | |
|---|---|---|---|---|---|
| परोपकारिन् | – | परोपकारिणाम् | तत् (पुल्लिङ्गम्) | – | तेषाम् |
| नर | – | नराणाम् | तत् (स्त्रीलिङ्गम्) | – | तासाम् |
| लता | – | लतानाम् | अस्मद् | – | अस्माकम् |
| साधू | – | साधूनाम् | युष्मद् | – | युष्माकम् |
| नदी | – | नदीनाम् | | | |
| राजन् | – | राज्ञाम् | | | |

## कोऽहं वदतु साम्प्रतम्

**त्रिनेत्रोऽपि शिवो नास्मि, घटो नास्मि जलान्वितः।**
**कूर्चश्मश्रुयुतो नित्यं, नरो नास्मि ब्रवीतु माम्॥**

**भावार्थः** – मम त्रीणि नेत्राणि सन्ति परम् अहं भगवान् शिवः नास्मि, जलेन युक्तः अपि अस्मि परं घटः अपि नास्मि अहं नित्यं श्मश्रुकूर्चेन युक्तः भवामि परम् अहं नरः अपि नास्मि। यदि भवद्भिः ज्ञायते तर्हि वदन्तु "अहं कः अस्मि"?

## एहि हसाम

**गणेशः** – विभो! विश्वे कति देशाः सन्ति?

**विभुः** – एकः।

**गणेशः** – तत् कथम्?

**विभुः** – मूर्ख! विश्वे एकः एव देशः अस्ति, अन्ये तु विदेशाः सन्ति।